Venkatrai Surina.
Laxmi narayaniya samhitā
Sanskrit
Devnagri
Handwritten on paper
309 pages



लक्ष्मीनारायणीयसंहिता
वेङ्कटरायसूरिणा संगृहीता
३०४ पृष्ठानि, ३७०० श्लोकात्मिका
(वैष्णवतन्त्रम्)

ओरियण्टल इंस्टीट्यूट, बड़ोदा
१३३०१ संख्या

लक्ष्मीनारायणीयम्

श्रीमन्तं श्रीलसत्कण्ठजगद्रूपं जगद्गुरुम् ।
विष्णुं महेश्वरं वन्दे नीलं श्वेतरुचिं प्रभुम् ॥१॥

ऋषभयोगी

देवसेनापते स्कन्द षडानन शिवार्चित ।
श्रीमन्नारायणो लक्ष्म्यै सर्वधर्मानुदैरयत् ॥२॥
प्रीत्या कथं तद्वृत्तान्तान् वक्तुमर्हसि मे प्रभो ।

स्कन्दः

ऋषभाहं प्रहृष्टोऽस्मि त्वत्सत्कथया त्वत्प्रपूजया ॥३॥
वेदशास्त्रार्थनिर्णीतान् विष्णुधर्मान् ब्रवीमि ते ।
तत्त्वं त्रिमूर्तिभेदश्च प्रथमे तदनन्तरे ॥४॥
लोकसृष्टिर्लोकजना: स्वाराज्या जातिस्वपणम् ।
जिह्वाचभेद्यजन्तूनां भूसृष्टिश्च निगद्यते ॥५॥
तृतीये सप्तपाताला शेषश्च लोकाश्च नारका: ।
तद्वासिदु:खं तत्पापशोकरोगाश्च तद्भिदा ॥६॥
तन्निष्कृतिक्रमश्चैव तुरीये भुवनोच्चय: ।
भूम्याब्धिविस्तृतिश्चैव जम्बूद्वीपश्च पञ्चमे ॥७॥

तत्रत्यनिम्नगा भूभृत् देश विष्णुशिवालयाः ।
षष्ठेऽर्कताराग्रहतयः चन्द्रोत्पत्त्युपरागकौ ॥८॥
कालस्सर्वजनानामुष्च सप्तमे दिननिर्णयः ।
दैवः पित्र्यः तथाऽन्य ... योगस्तद्दैवतावलिः ॥९॥
अष्टमे मानवी सृष्टिः स्वप्नवैश्वयोक्तकर्म च ।
नवमे क्षत्रियोत्पत्तिः सामुद्रिकविलोकनम् ॥१०॥
दशमे जातकफलं नीतिरेकादशे स्मृता ।
द्वादशे रत्नजातिश्च तेषामप्यर्घनिर्णयः ॥११॥
त्रयोदशे गजाश्वादिलक्षणं नाट्यलक्षणम् ।
चतुर्दशे यागभेदाः स्मार्तान्मेरपि वैभवम् ॥१२॥
ततः पञ्चदशे दिव्यवह्नेर्यजनतत्फले ।
षोडशे विप्रमहिमा चतुष्षष्टिकलाभिधा ॥१३॥
तथाह्निकं सप्तदशे कपिलामहिमापि च ।
अष्टादशे देवपूजा सालग्रामपरीक्षणम् ॥१४॥
शिवलिङ्गपरीक्षा च पूजाया वैभवं तथा ।
एकोनविंशे त्वातिथ्यं विंशे भोजनवैभवम् ॥१५॥
स्त्रीसङ्गमप्रकारश्च रूपितो ह्येकविंशके ।

सदसत्स्वप्नजफलं गृहस्थाश्रमलक्षणम् ॥१६॥
वानप्रस्थयतीनां तु द्वाविंशो लक्षणं स्मृतम् ।
त्रयोविंशो ज्ञानकाण्ड द्वैताद्वैतमतास्थितिः ॥१७॥
मुक्तिभेदश्चतुर्विंशो प्रोक्तस्सङ्करनिर्णयः ।
पा पञ्चविंशो तु नारीणां प्रातिव्रत्यस्य लक्षणम् ॥१८॥
पुत्रोत्पत्तिनिदानं च तथा सत्पुत्रलक्षणम् ।
षड्विंशे ..... श्च प्रायश्चित्तनिरूपणम् ॥१९॥
पितृतच्छ्राद्ध तल्लोकाः सप्तविंशो तु देवता ।
दानानां वैभवं चोक्तं अष्टाविंशो च वर्णितम् ॥२०॥
दशावतारमाहिमाख्ये ....
त्रिंशे त्रिपुरसंहारः कल्याणगिरिजेशयोः ॥२१॥
अविमुक्तिस्थलाख्यस्य काशीक्षेत्रस्य वैभवम् ।
गङ्गाया वैभवं चैव विश्वनाथस्य वैभवम् ॥२२॥
शिवस्योत्कर्षनिष्कर्षौ ग्रन्थस्यास्य फलश्रुतिः ।
इयतीह पुराणार्थपद्धतिर्विष्णुनोदिता ॥ २३॥
इत्यादि मनसि ध्यात्वा प्रणम्य पितरं विभुम् ।
वक्तुं स्कान्दस्समारेभे ऋषभाख्यमुनिं प्रति ॥२४॥

वैकुण्ठाख्ये पुरवरे मणिप्रासादशोभिते ।
मणिनिर्मितगेहान्ते वज्रमाणिक्यकुट्टिमे ॥२५॥
विरजाजलवीचीभिः धौतप्राकारमण्डिते ।
सनकाद्यैर्मुनिवरैः नित्यमुक्तैर्विराजिते ॥२६॥
ज्ञानभक्तिप्रपत्त्यादिगम्ये विष्णुपरायणैः ।
तन्मध्ये मणिसौधाग्रे रत्नसिंहासने स्थितम् ॥२७॥
इन्द्रनीलमणिप्रख्यं कौस्तुभोज्ज्वलवक्षसम् ।
पुण्डरीकविशालाक्षं श्रीवत्साङ्कितविग्रहम् ॥२८॥
शङ्खचक्रगदाखड्गगरुडाद्यैश्च सन्नुतम् ।
वनमालापरिवृतं भक्ताभीष्टवरप्रदम् ॥२९॥
इन्द्रादिदेवतावृन्दपूज्यमानपदाम्बुजम् ।
नेत्रानन्दनकारुण्येन्दुं कोटिमन्मथविग्रहम् ॥३०॥
चराचरजगद्व्याप्त्या जागरूकस्ववैभवम् ।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः ॥३१॥
तैस्सदा युक्तमव्यक्तं भगवन्तं परात्परम् ।
नारायणं जगद्योनिं दृष्ट्वा प्राणेश्वरं विभुम् ॥३२॥

प्रणम्य लक्ष्मीः प्रोवाच विनयोक्तिपुरस्सरम् ।
मत्प्राणनाथ देवेश कारुण्यनिलयाच्युत ॥ ३३॥
आगता लीलया गौरी शङ्करप्राणवल्लभा ।
पूजिता च मया गौरी मिथस्सल्लापसङ्गतौ ॥३४॥
.... त्युवाच मे धर्मान् स्वभर्तृगादितान् रहः ।
तान् श्रुत्वा पार्वती प्रोक्तान् तथा प्रभाति मत् ॥३५॥
त्वत्तोऽहं श्रोतुमिच्छामि सर्वधर्मान् ततोऽधिकान् ।
प्रपञ्चसृष्टिं जातीनां भेदं वर्णाश्रमोदितम् ॥३६॥
धर्मञ्च वद यच्चान्यत् अज्ञातञ्च तथा वद ।
त्वद्वागमृतपानेन मच्छ्रोत्रं चार्थमाप्नुयात् ॥ ३७॥
इदमेव वरं मेऽद्य दातुमर्हसि मत्प्रिय ।
तच्छ्रुत्वा प्रावदद्विष्णुः तथा वक्ष्ये शृणु प्रिये ॥ ३८॥
श्रुतिस्मृतिपुराणेषु वाल्मीकीये च भारते ।
बोधायनादिधर्मेषु सारमुद्धृत्य सर्वतः ॥ ३९॥
प्रपञ्चसृष्टिं लोकानां धर्मान् वक्ष्ये शृणु प्रिये ।
इत्युक्त्वा चिन्तयन् सर्वं वेदशास्त्राणि चेतसा ॥४०॥

ऋग्वेदश्च यजुर्वेदः सामाथर्वा चतुर्विधाः ।
आयुर्वेदस्तु ऋग्वेदे धनुर्वेदो यजुष्यपि ॥४१॥
साम्नि गान्धर्ववेदस्स्यात् अर्थवेदो ह्यथर्वणि ।
अङ्गवेदास्तु विज्ञेयाः क्रमादेते महाफलाः ॥४२॥
आयुश्शास्त्रं शिल्पशास्त्रं ज्योतिषं धातुवादकम् ।
आयुराद्युपवेदोयः चत्वारो जज्ञिरे सुताः ॥४३॥
शीक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ।
छन्दश्चेति षडङ्गानि ऋगादीनां महीयसाम् ॥४४॥
प्र ····· प्रतिपदं छन्दोज्ञानं स्वरसमुद्भवः ।
न्याय तर्कश्च मीमांसेत्युपाङ्गान्युदितानि षट् ॥४५॥
ऋगादीनां धर्मपत्न्यः सामं धेनिस्रुगाह्वया ।
जुहुत्सामित्समाख्याताः चतुर्णां वाधि निर्मिताः ॥४६॥
तथा चैवोपनिषदः द्वात्रिंशत् परिकीर्तिताः ।
ईशावास्यं च केनाख्यं कठवल्ल्यभिधं ततः ॥४७॥
मण्डूकञ्चैव माण्डूक्यं छान्दोग्यं तैत्तरीयकम् ।
प्रश्नाख्यं बृहदारण्यमैतरेयं तथैव च ॥४८॥

गर्भाख्यं चैव कैवल्यं श्वेताश्वतरमेव च ।
कालाग्नीरुद्रहंसंच नारायणमतः परम् ॥४९॥
शारीरं नादबिन्द्वाख्यं मन्त्रञ्चामृतबिन्दुकम् ।
ब्रह्माख्यं चैव जाबालमथर्वशिर वर्चपम् ॥५०॥
बृहज्जाबालकञ्चैव सुबालकमतः परम् ।
मैत्रेयं परहंसं च क्षुरिकं नामकं तथा ॥५१॥
कौषीतं तापनीयं च आरुणिनामकं ततः ।
मैत्रायणीयं चाथर्वशीखा संज्ञामनुक्रमात् ॥५२॥
एतान्युपनिषच्छब्दवाच्यानि सुमहान्ति च ।
तिष्ठन्ति ब्रह्मनिकटे तस्मादुपनिषत् स्मृताः ॥५३॥
मोक्षैकहेतुभूतानि नृणां श्रवणमात्रतः ।
आद्यं शास्त्रेषु तर्काख्यं वैशेषिकमतः परम् ॥५४॥
मीमांसा शास्त्रमपरं तुर्यं वेदान्तनामकम् ।
पञ्चमं योगशास्त्रं तु षष्ठं सांख्याह्वयं तथा ॥५५॥
षडेतानि हि शास्त्राणि जगत्येतैर्निमय्यते ।
एतेभ्य उपशास्त्राणि जज्ञिरे षडनुक्रमात् ॥५६॥

तर्कशास्त्रं नीतिशास्त्रं नानार्थपरिबृंहितम् ।
वैशेषिकाः प्रमाणाख्यं शास्त्रं युक्तिविगृहीतम् ॥५७॥
मीमांसाशास्त्रतो धर्मशास्त्रं कर्मक्रियात्मनः ।
अध्यात्मशास्त्रं उदात्तशास्त्रात् श्लोकैकमोचजम् ॥५८॥
योगशास्त्रात्तत्वशास्त्रमात्मज्ञानप्रदर्शकम् ।
सांख्यशास्त्रात्मोक्षशास्त्रं सर्वदुःखहरं नृणाम् ॥५९॥
संगृहीतानि मुनिभिः उपशास्त्राणि यानि बहु ।
एवं शास्त्रोपशास्त्राणामङ्गं शास्त्रमनुत्तमम् ॥६०॥
शब्दशास्त्रं महत्वाख्यं मूलव्याकरणान्वितम् ।
पुराणानि दशाष्टौ च वेदा यैस्तु परिष्कृताः ॥६१॥
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
नारदीयाभिधं षष्ठं मार्कण्डेयं तु सप्तमम् ॥६२॥
आग्नेयं च भविष्यं च ब्रह्मवैवर्तकं तथा ।
लैङ्गं वाराहकं स्कान्दं वामनं कौर्ममेव च ॥६३॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ।
अष्टादश पुराणानि व्यासेनोक्तानि भामिनि ॥६४॥

तथैवोपपुराणानि तावन्त्येव महान्ति च ।
चातुर्लक्षप्रमाणेन चक्रे पाराशरो मुनिः ॥६५॥
आद्यं सनत्कुमारोक्तं नारसिंहं द्वितीयकम् ।
स्कान्दञ्च शिवधर्माख्यं दौर्वासं नारदीयकम् ॥६६॥
कापिलं मानवञ्चैव शौक्रं ब्रह्माण्डमेव च ।
वारुणं कालिकाख्यं च महेश्वरसमीरितम् ॥६७॥
सांबं सौरं च मारीचं पाराशर्यं च भास्करम् ।
एतान्युपपुराणानि वेदव्यासोदितानि हि ॥६८॥
काव्येतिहासकथनकल्पवृजिनसंज्ञकैः ।
शैववैष्णवचाराख्यैरतिचित्रकथान्वितैः ॥६९॥
पुराणभिन्नान्यन्यानि कानिचित्तु सन्ति भामिनि ।
काव्यं रामायणं प्रोक्तमितिहासं तु भारतम् ॥७०॥
इतिहासोत्तमं तद्वत् इतिहाससमुच्चयम् ।
हरिवंशस्तु कथितः सर्वार्थपरिबृंहितः ॥७१॥
शिवधर्मादयश्चान्यः कथितो लोकपावनः ।
कल्पास्तु सप्त विज्ञेयाः पृथक् सप्तसहस्रकाः ॥७२॥

वैशाखस्तु कर्मीश प्रथमः नानाचित्रकथाश्रयः ।
द्वितीयो दानवासिष्ठः तृतीयोऽप्सरसाह्वयः ॥७३॥
संपातस्तु चतुर्थस्स्यात् पञ्चमो मोहनान्वयः ।
धर्माधर्माह्वयष्षष्ठः यौनिकल्पस्तु सप्तमः ॥७४॥
एते सर्वार्थदा नृणां श्रवणात् पापहारिणः ।
दश चैव पुरावृत्ताः सन्ति दानोपपादकाः ॥७५॥
तेष्वादिमो हरिश्चन्द्रमाहात्म्यकथनक्रमः ।
सावित्र्युपाख्यानमपि पृथुभूपचरित्रकम् ॥७६॥
चतुर्थस्तु नलोदन्तः सौदासोदन्त एव च ।
षष्ठः कुशलवोदन्तः मान्धातुश्च चरित्रकम् ॥७७॥
ततो रुक्माङ्गदोदन्तं दुष्यन्तोदन्त एव च ।
दुन्धुमारस्य माहात्म्यं पुरावृत्ता दशोदिता ॥७८॥
शिवधर्माह्वयं शास्त्रं विष्णुधर्माह्वयं तथा ।
तस्य चतुर्लक्षान एषां ग्रन्थप्रमाणकः ॥७९॥
पुराणभिन्नान्येतानि किञ्चिज्जानि महर्षिभिः ।
विष्णुः पराशरो दक्षो .... मनुहारितः ॥८०॥

शान्तातपो वसिष्ठश्च यमापस्तम्बगौतमाः ।
देवलश्चैव शङ्खश्च भरद्वाजोशनात्रयः ॥८१॥
शौनको याज्ञवल्क्यश्चेत्यष्टादश मुनीश्वराः ।
एतैः प्रवर्तिता लोकैः स्मृतयोऽष्टादशोत्तमाः ॥८२॥
उपस्मृतिप्रवर्तारः ऋषयोऽष्टादश स्मृताः ।
जाबालिर्नाचिकेतश्च स्कन्दलोकाक्षिकाश्यपः ॥८३॥
सनत्कुमारो लिखितः शन्तनुर्जनकस्तथा ।
व्याघ्रः कात्यायनो बभ्रू जातुकर्णः कपिञ्जलः ॥८४॥
बौधायनः कणादश्च विश्वामित्रो महातपाः ।
त उ सुमन्तुरेते मुनयः ततोपस्मृतिकारिणः ॥८५॥
वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहाः ।
पैठीनसी गोभिलश्च गार्ग्यः काष्णाजिनिस्तथा ॥८६॥
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः ।
आत्रेयः छागलेयश्च मरीचिर्वत्स एव च ॥८७॥
पारस्करो ऋष्यशृङ्गः बैजवापिस्तथैव च ।
सत्यव्रतश्च दत्तारः एकविंशतिरीरिताः ॥८८॥

एतेषु स्मृतिषु प्रोक्ताः चत्वारो लोकसंमताः ।
आचारो व्यवहारश्च तथा कालादिनिर्णयः ॥८९॥
प्रायश्चित्तक्रमश्चैव कीर्त्यन्ते स्मृतिषु प्रिये ।
नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनम् ॥९०॥
उद्यानसलिलक्रीडा मधुपानरतोत्सवाः ।
विप्रलम्भो विवाहश्च कुमारोदयवर्णनम् ॥९१॥
मन्त्रदूतप्रयाणाजिनायकाभ्युदयास्तथा ।
काव्येष्वष्टादश विधा वर्ण्यन्ते काव्यवेदिभिः ॥९२॥
विधिमन्त्रार्थवादाश्च वेदेषु गदितास्त्रयः ।
सूत्रं भाष्यं वार्त्तिकं च त्रयं शास्त्रेषु वर्ण्यते ॥९३॥
पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्याने परिकीर्तिताः ॥९४॥
आगमानां प्रभेदाश्च कथ्यन्ते शिवसंमताः ।
आदौ वैदिकतन्त्राणामनुक्रमणिकोच्यते ॥९५॥
सर्वज्ञानोत्तरं चन्द्रं ज्ञानं ज्ञानार्णवाह्वयम् ।
आरुणेश्वरतन्त्रं च विशुद्धेश्वरनामकम् ॥९६॥

त्रैपुरं तु महादेव तन्त्रं भामोत्तरं तथा ।
कालोत्सारं कालवादं तन्त्रं योगीश्वरं मतम् ॥९७॥
पूर्वाम्नायाह्वयं श्रीताममनायाख्यं चाप्यनुत्तमम् ।
पश्चिमाम्नायकामिख्यं मुक्ताम्नायनामकम् ॥९८॥
अनुत्तराम्नायतन्त्रमूर्ध्वाम्नायाह्वयं तथा ।
कुण्डीश्वरमतं वीणातन्त्रं गुह्याह्वयं महत् ॥९९॥
कुलचूडामणितन्त्रं कुलासाराह्वयं तथा ।
हृद्भेदं मात्रभेदञ्च वातुलं वातुलोत्तरम् ॥१००॥
सर्ववीतमतं चैव कौतालं कौतलोत्तरम् ।
बहुरूपाष्टकं चैव यामलाष्टकमेव च ॥ १॥
किरणाख्यं महातन्त्रं एकात्रिंशादिमानि हि ।
अनुसृत्य तु देवोक्तकर्मण्यनुचरन्ति हि ॥२॥
अवैदिकाचारवतां तन्त्राणां क्रम उच्यते ।
महामाया शाम्बरं च योगिनीमीजशाम्बरम् ॥३॥
तत्त्वशाम्बरकं चैव कुलार्णवमतः परम् ।
महासंमोहनं चैव कापिकामतमेव च ॥ ४॥

विशालिकामतं चैव नित्याषोडशीकाह्वयम् ।
पारिशिष्टानन्दतन्त्रममरेश्वर एव च ॥१०५॥
वामजिष्टं कुलोदिष्टं रूपभेदं तु कामिकम् ।
पञ्चामृतं च कल्याणं भूताख्यं भैरवाष्टकम् ॥६॥
राजितं गारुडं बालातन्त्रं वासुकिनामकम् ।
महाकालिमतं चैव महावीरवती मतम् ॥७॥
महालक्ष्मीमतं चैव महामायामिध्यं तथा ।
मन्त्रोन्नराख्यं विमलं मतं वीरुंमतिं मतम् ॥८॥
ललिताख्यानतन्त्रं च ललितामतमेव च ।
महाकुलेश्वरी चूडामणितन्त्रमनुत्तमम् ॥९॥
नपालिंघात् प्रभेदानि प्रवैश्यादिकवतां नृणाम् ।
एवमेवोपतन्त्राणि षोडशात्र चरान्ति हि ॥११०॥
मन्त्रार्णवं मन्त्रसारं महाकालं तु शाम्भवम् ।
भट्कालागमतन्त्रं च मूलवात्केयनामकम् ॥१११॥
षड्डामरेश्वरं राजतन्त्रं लाकुलकेश्वरम् ।
तथा मृगमुखीतन्त्रं चण्डरुद्रेश्वरं ततः ॥११२॥

सौभाग्यवल्लरीतन्त्रं तालचण्डेश्वरं तथा ।
हलं मेखलकं शैवं कौतुकं चेति वै क्रमात् ॥१३॥
पञ्चवक्त्रस्य वक्त्रेभ्यः पञ्चभ्यः परिजज्ञिरे ।
अष्टाविंशतिसंख्याकाः कामिकाद्या महागमाः ॥१४॥
तेषामाद्यः कामिकाख्यं द्वितीयं कारणागमः ।
अजितागमनामा तु तुर्यश्चिन्त्यागमाह्वयः ॥ ११५॥
योगजश्चैव देवस्य सद्योजातं मुखाच्च्युताः ।
जयागमो वीरसंज्ञागमो निश्वासकागमः ॥१६॥
- भवनलनामानावघोरमुखसंभवाः ।
रौरवो मकुटश्चैव चन्द्रज्ञानाह्वयस्तथा ॥१७॥
बिम्बाख्यो विमलाख्यश्च मुखात्तत्पुरुषच्युताः ।
प्रोद्गीतश्चैव सिद्धश्च ललितागम एव च ॥१८॥
सर्वोक्ताश्चैव सन्तानि किरणो पारमेश्वरः ।
वातुलश्चापि चेशानामकाद्वदनाच्च्युताः ॥१९॥
दिवं सूक्ष्मसहस्रं च अंशुमान् सुप्रभेदकम् ।
योगजस्यैव शर्वस्य वामदेवमुखाच्च्युताः ॥१२०॥

एतेषां विंशतिश्शैवागमाः प्राधान्यतः स्मृताः ।
एतेभ्यश्च समुत्पन्नाः पृथक् पृथगुपागमाः ॥२१॥
अष्टाविंशोत्तरशतसंख्याकाः परिजज्ञिरे ।
वैखानसं पाञ्चरात्रं प्रतिष्ठासारमेव च ॥२२॥
विज्ञानललितञ्चेति चत्वारो वैष्णवागमाः ।
संहिताशास्त्रकर्तारः शतं वै ऋषयस्स्मृताः ॥२३॥
हयग्रीवश्च गार्ग्यश्च शौनको मनुरेव च ।
बोधायनस्सुमन्तुश्च याज्ञवल्क्यश्च वातुलः ॥२४॥
व्यासो बृहस्पतिश्चैव यमो गौतम एव च ।
प्राजापत्यादि मौद्गल्याः वसिष्ठो भार्गवस्तथा ॥१२५॥
शातातपो वामदेवः वृद्धशातातपस्तथा ।
जमदग्निर्जैमिनिश्च जातुकर्णश्च जाबलिः ॥२६॥
जाबालिर्जैमनित्यश्च ज्ञानं निर्जह्नुरेव च ।
ज्योतिष्मान् जीवलश्चैव नीतिहोम . . . . ॥२७॥
शालिहोत्रस्सुहोत्रश्च वीतिहोत्रस्तदनन्तरम् ।
दशहोत्रो यज्ञहोत्रः शतहोत्रस्तथैव च ॥१२८॥

नित्यहोतृ प्राणहोतृः सहस्राक्षस्तथैव च ।
अन्धगरुपासुरी विश्वामित्राष्टशब्दा वक्रपिङ्गला ॥ २९॥
प्रगाथचूलिस्रगवः सुधनश्च ततः परम् ।
मतङ्गश्च यमश्चैव राजलश्च तथैव च ॥१३०॥
वृन्दावनश्चोलूकश्च मात्स्यायनभृगन्धुकौ ।
स्कन्दः पिप्पलादश्च च्यवनो चूत एव च ॥ ३१॥
कपिलो नैध्रुवश्चैव काश्यपो ऋश्यशृङ्गदा ।
शुनश्शेपो दीर्घतमा कौण्डिन्यस्तदनन्तरम् ॥ ३२॥
मेधातिथिश्च मौलाक्षिशुद्धकालप्रदीपके ।
विष्णुर्वृद्धश्च वत्सश्च वाद्धीशः संस्कृतिस्तथा ॥३३॥
बृहद्रथः कविश्चैव हारीतः कुत्स एव च ।
निजन्तुश्चैव बभ्रूश्च काक्षिवानातिथिस्तथा ॥ ३४॥
भास्करश्च पाणिः पूतिमाषो नकुल एव च ।
नारायणो देवशान्तः कालिमन्त्र प्रदीपकाः ॥ १३५॥
योगनारायणीयारण्यद्रामन्यामिधस्तथा ।
ज्ञानकौमुदिकाभिख्या सुधासारस्तथैव च ॥ ३६॥

सनत्सुजातो यवनः बालखिल्या इति क्रमात् ।
संहितासंप्रणेतारः ऋषयः कीर्तिता अमी ॥१३७॥
इत्यादि सर्वशास्त्रेषु चतुष्षष्टिकलासु च ।
सारमुद्धृत्य सर्वत्र वक्ष्ये शृणु तलोदरि ॥१३८॥
स्कन्दः —
ध्यात्वा मनसि तत्सर्वं वक्तुं विष्णुस्तमुद्यतः ।
नारायणः —
जगत्सृष्टिं प्रवक्ष्यामि वेदमार्गानुसारतः ॥१३९॥
नासदासीन्नोसदासीत् इदं वा अग्र इत्यपि ।
अनुवाकद्वयस्यार्थं सारं संगृह्य चान्यतः ॥१४०॥
सारमुद्धृत्य वक्ष्यामि शृणु त्वं कमलेक्षणे ।

इति श्रीवेङ्कटरायविरचिते पुराणार्थसंग्रहे
लक्ष्मीनारायणसंवादे संज्ञाप्रकरणो
नाम प्रथमोऽध्यायः ॥

॥ श्रीः ॥

नारायणः

चिन्मयो ज्ञानिभिर्वेद्यः वेदानामप्यगोचरः ।
परं ब्रह्म परं ज्योतिः परमात्मा परात्परम् ॥ १॥
आदिमध्यान्तरहितः परिपूर्णस्सनातनः ।
कर्तुं लीलाविभूतिस्थः नित्यभूतिसमन्वितः ॥ २॥
अजामेकां त्रिगुणकां मायां संसार साऽसृजत् ।
मायाशबलितो देवः लीलाभूतिकृतिप्रियः ॥ ३॥
निसर्ज जले विश्वं तदण्डमभवाग्निभे ।
प्रकृतैर्महदाद्यैश्च भूतैरण्डं विनिर्मितम् ॥ ४॥
महाजलौघमध्ये तु विभ्रमत्कोटिभास्करम् ।
ब्रह्माण्डं जलसंपूर्णं प्राविशन्मायया सह ॥ ५॥
तत्सृष्ट्वा प्राविशत्तच्चेत्यर्थो वेदे निगद्यते ।
कोटिसूर्यप्रतीकाशो भूत्वा तज्जलशोषणम् ॥ ६॥
अकरोत्ततदा ब्रह्मन् अजाण्डोऽभूतदण्डकम् ।
अजाण्डाद्भुतमुत्पन्नं वायोरग्नेर्जलम् ॥ ७॥
तज्जलं · · · · · · · दण्डस्यार्धे स्थितं जलम् ।
अण्डस्यार्धगतं नीलं दृष्ट्वा मायासमन्वितम् ॥ ८॥

यस्तो कारणात्मानः जातास्साक्षान्महेश्वरात् ।
परापरपुरौघाख्यप्रकारश्च यथातथम् ॥९॥
आकाशमध्यगो देवः लीलार्थं स द्विधोऽभवत् ।
अन्तर्मातृकं बहिर्मायमन्तर्मायां बहिर्मति ॥१०॥
एवं द्विरूपमासाद्य यद्रूपे चिद्बहिर्भवेत् ।
तेन सात्त्विकभावेन चैतद्रूपास्त्रिनेत्रभाक् ॥११॥
सर्वेश्वरोऽभवत्सोऽपि भूतैः पञ्च विधानतः ।
बहिर्मायावदंशेन नीलरूपश्चतुर्भुजः ॥१२॥
अभवन् सोऽहमब्जाक्षि ब्रह्मैक्यं तादृशा भवेत् ।
तमोगुणशरीरेण संभूतं तज्जलोपरि ॥१३॥
शयानं वज्रभागेन पुरुषं चारुरूपिणम् ।
त .... रूपं मामालोक्य विस्मयस्स महेश्वरः ॥१४॥
शुद्धस्फटिकसंकाशः दृष्टवान् माययेक्षितः ।
अधस्विदासीदुपरि स्विदासीदिति हि श्रुतिः ॥१५॥
अन्योन्यदर्शनादेव काले कतिपये गते ।
मन्नाभिकमलाज्जातं स्वर्णवर्णं चतुर्मुखम् ॥१६॥

एवं स्वयम्भुवं दृष्ट्वा तत्समीपमगाच्छिवः ।
मया साकं तस्य सर्वमुपदेष्टुं जगद्गुरुः ॥ १७॥
पृष्ट्वा चतुर्मुखो देवं कोऽहमित्यब्रवीत् स्वयम् ।
श्रुत्वा वचोऽब्रवीत् शम्भुः कमेव त्वामवेहि भोः ॥१८॥
कुतो जातोऽहमित्याह त्वमजोऽपि च पद्मभूः ।
त्वत्तः पूर्वं जातजन्तुः नास्ति तस्मादजः स्मृतः ॥१९॥
समत्वं समकं देव ब्रवीति त्वामवेहि भो ।
सर्वाधिपत्यं किं देव भाविताख्यः प्रजापतिः ॥२०॥
मम नाम च किं देव त्वं नाम तु पितामहः ।
करणीयं त्वया किञ्चित् तस्मादहमिहागतः ॥२१॥
करणीयं मया किं तु श्रीजलोर्ध्वप्रक्रमम् ।
क्रमंशं भो न जानामि पश्य वेदान् सनातनात् ॥२२॥
का वा शक्तिस्तान् गृहीतुं वाणी भवतु ते प्रिया ।
कुत्र स्थास्यामि देवेश सत्ये तिष्ठ चिरन्तने ॥२३॥
अतः प्रजानामधिपाः सत्ये तिष्ठन्ति भामिनि ।
इत्युक्तिमात्रतस्सर्वं तत्प्रसादात् बभूव हि ॥२४॥

स्थानं तदा सत्यलोकः वाणी तस्य सरस्वती ।
तिष्ठन्तं पुरतश्शम्भुं दृष्ट्वा तुष्टाव तं विधिः ॥२५॥
विदेकवेद्यचिद्रूप तेजोराशेर्भवत्प्रभो ।
अण्डात् बहिर्द्योतमानं जगत्सृष्टिमिहागतः ॥२६॥
सगुणं रूपमास्थाय मत्प्रीत्यर्थं हि दृश्यसे ।
को वेत्ति महिमानं ते को वा ते सदृशो भवेत् ॥२७॥
अतोऽहं त्वत्प्रसादेन भवेयं लोकनायकः ।
अत्रैव यदि तिष्ठेत् त्वं त्वत्सान्निध्यादहं प्रभुः ॥२८॥
अयं वरो मे दातव्यः भक्ताभीष्टवरप्रद ।
सर्वेश्वरोऽपि तच्छ्रुत्वा ...... मत्या पुष्पान्वितः ॥२९॥
तथा ॥ अताखिलक्ष्मवीकला लात्वा मां पृष्टवान् शिवम् ।
इमं न जानामि विभो वद तत्त्वं जगत्प्रभो ॥३०॥

शिवः

अयं विष्णुर्महाभागः जगदात्मा जगद्गुरुः ।
इमं विना नास्ति शक्तिः कर्तुः किञ्चित् स्वयं मम ॥३१॥
अहमेव हरिस्सोऽहमावयोर्नास्ति भिन्नता ।
आवामभिन्नौ मत्वा तं समबुद्धिर्भवावयोः ॥३२॥

तस्मादहं च विष्णुश्च वसावस्ताव पार्श्वयोः ।
इत्युक्तिमाकर्ण्य तुष्टिं ययौ पङ्कजसम्भवः ॥३३॥
महेश्वरो मामुवाच ब्रह्मन्प्रियचिकीर्षया ।
मम वेतावयोर्लोकौ वसेवाकमुभावपि ॥३४॥
ब्रह्मलोकस्य पार्श्वे च स्यातां लोकौ ममाज्ञया ।
इदानीं रुद्ररूपेण तमोगुणमयेन च ॥३५॥
मुक्तो नारायणाख्यस्त्वं लक्ष्म्या साकं ममस्तुवः ।
वैकुण्ठाख्ये पुरे स्थित्वा पाहि सृष्टं स्वयंभुवा ॥३६॥
रजोगुणसमुद्भूतरूपेण सह संभृताम् ।
वाण्या साकं जगत्कर्ता विरिञ्चेति प्रथां गतः ॥३७॥
सत्याख्यलोके निवसन् जगत्सृष्टिं करोत्ययम् ।
सुसात्त्विकगुणोद्भूत रुद्ररूपेण संभृतः ॥३८॥
हरनाम्ना त्वहं देव्या शिवया सहितोऽनिशम् ।
स्थित्वापराजितपुरे प्रलये समुपस्थिते ॥३९॥
संहरामि जगत्सर्वमेवं वर्तामहे स्वयम् ।
मम शक्त्यात्मिका वाणी शिवा त्वच्छक्तिका मता ॥४०॥

ब्रह्मशक्त्यात्मिका लक्ष्मीः भवेयुर्वनिताश्च नः ।
या शक्तिर्यस्य पत्नी स्यात् तच्छक्तेरनुरूपकम् ॥४१॥
कार्यं कुर्यात् स एवेति सङ्केतं करवावहै ।
सृष्टिपालनसंहारकार्येषु त्रिषु यत्र यः ॥४२॥
नियुक्तस्तस्य तत्काले भवेतां वशगावुभौ ।
अहं युवां पूजयामि मत्पूजां कुरुतं युवाम् ॥४३॥
अन्योन्यपूजाकलनात् पूजयिष्यन्ति नः प्रजाः ।
अन्योन्यसंमतिं कृत्वा त्रिलोकेषु स्थिता वयम् ॥४४॥
तथा कृष्णोऽवतारेषु मत्स्यादिषु तथा वयम् ।
पुरा त्रिपुरदाहेच्छोः शिवस्याहं शरोऽभवम् ॥४५॥
मेघो भूत्वा महादेवं बिभर्मि बहु वत्सरान् ।
सारथीः पद्मभूरासीः अन्ये देवाश्च किङ्करा ॥४६॥
संहारकार्यकलने सो हराक्षीशीभ्य तम् ।
दग्धवान् मत्स्तुतं भारं एतत्सर्वं सहावहे ॥४७॥
अवतारेषु सर्वेषु पूजयाम्यहमीश्वरम् ।
मत्पुत्रस्य च तन्नाम कृतवानस्मि सुन्दरि ॥४८॥

अर्चारूपे शैवलिङ्गे पूजा सकलयाज्ञिकैः ।
तदेक्षाननन्यसुलभं कार्यं ब्रह्म .... ॥४९॥
जगत्पालनकार्येषु सदा ह्यक्षमुमापतिः ।
अशक्नुवन् सोढुमभूत् स्वामितस्तद्धनुर्हतम् ॥५०॥
अधिकं मेनिरे विष्णुं देवाश्चेति पुराणगीः ।
बाणासुराजौ सर्वेशः उन्मुखे स्थातुमक्षमः ॥५१॥
पलायनं चकारासौ सपुत्रस्य पिनाकधृत् ।
सं स्तुत्वा मोचयामास बाणच्छिन्नकरावलिम् ॥५२॥
दक्षाध्वरे हि रुद्रस्य धनुषापहृतं शिरः ।
सन्धाय तच्चाकरवं सशीर्षं रुद्रमिन्दिरे ॥५३॥
भस्मासुरो भयाल्लीनमरक्षं बुद्धिकौशलात् ।
मन्नाभिकमलाज्जातं ब्रह्माणं वीक्ष्य देवताः ॥५४॥
ब्रह्मेति शाविदद्देवा सृष्टौ काम्यां समीडिताम् ।
रुद्रं मदंशोपेतं वा पुत्रपौत्रस्वरूपिणौ ॥ ५५॥
दृष्ट्वा ब्रह्मसमुद्भूतौ विदुर्ब्रह्मेति पद्मजम् ।
अन्योन्यमेव तिष्ठाम न्यूनाधिक्यकुमार्गगाम् ॥५६॥

वयं मया नित्यभूतौ लीलाकाले वशंवदा ।

वृषभयोगी

तथाऽस्थितेषु देवेषु किमभूत्तदनन्तरम् ॥५७॥
कथं लोकान् ससर्जादौ ब्रह्मा तद्वद मे प्रभो ।

स्कन्दः

तच्छ्रुत्वा प्राबदल्लक्ष्मीः भर्तारं किमतः परम् ॥५८॥
युष्माभिः किं कृतं तन्मे वद तत्त्वं जगत्प्रभो ।

नारायणः

सत्यलोकस्य पार्श्वे च वसन्तौ वीक्ष्य मां स्त्रीकम् ॥५९॥
आवयोस्सन्निधानेन सृष्टा सृष्टिं प्रचक्रमे ।
चतुर्मुखैश्चतुर्वेदान् गृहीत्वा ध्यानमास्थितः ॥६०॥
ज्ञात्वा क्रमेण वेदार्थान् यथापूर्वं ससर्ज सः ।
सृष्टिकामस्तपस्तेपे प्राणायामपुरःसरम् ॥६१॥

(पृ. १८ समाप्त)

देवानां कारणं विष्णुरेवं ऋचि निगद्यते ।

(पृ. २२, पं. ४)

लक्ष्मीः – तल्लोकान् तत्र तत्रस्थान् वद संग्रह्य मे प्रभो ।

(पृ॰ २३, पं॰ २०)

अपराजितपुरे (पृ॰ २३, पं॰ २३)

विष्वक्सेनश्च सेनानी (पृ॰ २४, पं॰ १६)

सगुणोपासनान्मुक्ताः तत्र नागरिकाः स्मृताः। (तत्र वैकुण्ठे)

(पृ॰ २४, पं॰ १९)

मनोहे सत्यलोकाख्ये पुत्रैस्संन्यासयोगतः ।

ब्रह्मर्षिभिस्सुरश्रेष्ठैः पूजितः कमलासनः ॥ (पृ॰ २४, पं॰ २०–२१)

एकादशरुद्रेषु द्वितीयस्य 'अहिर्बुध्न्य' इति नाम वर्तते – पृ॰ २६, पं॰ २०

चारो देवर्षिनारदः (पृ॰ २७, पं॰ १४) तत्र = स्वर्गलोके ।

लक्ष्मीः – भुवर्लोके स्थिताभ्राणां पिशाचानां तथैव च ।

जातिस्वरूपनामानि वद तत्त्वं जगत्प्रभो ॥ (पृ॰ २८, पं॰ ३–४)

लक्ष्मीः – गर्जनं किं तडित् किन्तु दम्भोलिः किं वद प्रभो ।

(पृ॰ २९, पं॰ १६–१७)

प्रवर्षति जलं मेघ इति रामायणोक्तितः । (पृ॰ २९, पं॰ २२)

एवं रामायणे दृष्टम् (पृ॰ ३०, पं॰ ७)

मेघजाति त्रिधा स्मृता। ···· भौमश्चाप्यश्च जातितः ॥ (पृ॰ ३१, पं॰ २–३)

संवर्तः पुष्करो द्रोणः कालको वारुणस्तमः ।

नीलो वायुस्तथावर्तः नवमेघाः प्रकीर्तिताः ॥ (पृ॰ ३१, पं॰ ५–६)

मेघस्वरूपं कथितं वक्ष्ये ग्रहणां शृणु ।

देवग्रहस्तु गन्धर्व यक्षगन्धर्वदानवाः ॥

उरगेश्वरनागानौ ब्रह्मराक्षसराक्षसौ ।

पितृप्रेतपिशाचाख्याः कूश्माण्डस्वान्तकालिकः ॥

भेतालकालोदनरा ह्यष्टादश विधाः स्मृताः ।

ते चरन्ति भुवर्लोके भैरवाज्ञा वशंवदा ॥

(पृ. ३१, पं.१७-२२)

लक्ष्मीः – ग्रहाः कियन्तस्संख्याकाः भुवर्लोकनिवासिनः । ...

ग्रहग्रस्ताः कथं तिष्ठेन्नरस्तद्वद मे प्रभो: ।

(पृ. ३२, पं. ६-७;१५-१६)

ततः परं प्रवक्ष्यामि भूसृष्टिं कमलेक्षणे ।

एवं सृष्ट्वा तु षट् लोकान् ब्रह्मा काश्यपमब्रवीत् ॥

(पृ. ३४, पं. २३-२४)

लक्ष्मीः – गिरीनां च गजानां तु नामधेयं वद प्रभो । ....

ते जीवाः कतिसंख्याकाः कतिभेदाश्च तद्वद ।

(पृ. ३६, पं. १८-१९; पृ. ३७, १०-११)

लक्ष्मीः – एतेषां विधिना सृष्टः को वाऽऽहारो वद प्रभोः ।

(पृ. ३८, पं.३-४)

सारभूतां वरां काशीं सर्वाभीष्टवरप्रदाम् ।

सत्यामृततत्त्वं कथये सर्वकामफलप्रदम् ॥ (पृ. ३८, पं. १६-१७)

द्वितीयाध्यायः समाप्तः

सप्तपातालालोकानां नामानि वर्णनं च (पृ. ३९-४१) ।

लक्ष्मी: — नरकाणां नाम किंतु तत्रस्थाः पापिनश्च के ।

तच्च तान्यपि मे ब्रूहि विस्तरेण प्रियाधुना ॥ (पृ.४१, पं. १९-२१)

पापं नवविधम् (पृ.४३, पं.१८),

पापमूलानि कर्माणि प्राहुः पञ्चविधानि हि । (पृ.४४, पं. २)

तत्तापभोग्ययोग्यास्तु देशाः पञ्चविधाः स्मृताः । (पृ.४४, पं. ५)

लक्ष्मी: — नरकानुभवः पापफलं चेत् भूतले नृणाम् ।

व्याधिपीडा कस्य फलं वद मे प्राणवल्लभ ॥ (पृ.४६, पं.४-६)

काशीं गत्वा तु जाह्नव्यां स्नात्वा विश्वेश्वरं विभुम् ।

दृष्ट्वा प्रमुच्यते सर्वपापैर्मुक्तिं च गच्छति ॥ (पृ.५१, पं. ३-४)

॥ तृतीयाध्यायः समाप्तः ॥

लक्ष्मी: — अण्डस्य परिमाणञ्च तन्मध्य(स्थ) च विस्तृतिम् ।

लोकानां परिमाणं च वद तत्त्वं जगत्प्रभो ॥ (पृ. ५१, पं.१५-१७)

योजनस्य प्रमाणं तु वद मे सर्ववित्तम । (पृ.५३, पं. १३)

धनुःसहस्रे द्वे क्रोशं गव्यूतिस्तद्द्वयं भवेत् ।

गव्यूतीनां चतुष्कं तु योजनं परिचक्षते ॥ (पृ.५३, पं.१५-१६)

मण्डलस्य च विस्तारो गदितो मात्प्रिय त्वया ।

तत्र तत्र स्थिता भूपास्तत्र तत्र स्थिता जनाः ॥

तत्रस्थपर्वता नद्यः सर्वे विस्तारं मे वद । (पृ.५४, पं.१६-१८)

लक्ष्मीः - .... जम्बूद्वीपं सम्यग् वद प्रभो। (पृ.५८, पं.१)

॥ चतुर्थोऽध्यायः समाप्तः॥

उत्तरे कुरुदेशे तु मानवाः पुण्यशालिनः।

कथं तिष्ठन्ति सुखिनः वदमे च प्रियाधुना॥ (पृ.६०, पं.१८-१९)

कानि दानानि कुर्वन्तः निवसन्ति कुरौ नराः। (पृ.६१, पं.६)

कर्मभूमिं च विस्तार्य वद सर्वविदां वर। (पृ.६२, पं.२३)

कर्मभूमौ तु गिरयः कियन्तस्तान् क्रमाद्वद। (पृ.६४, पं.१४)

एकषष्टिनदीनामानि - पृ.६५-६६

देशान् भारतखण्डस्थान् षट्पञ्चाशाद्विधान् वद। (पृ.६७, पं.२)

नानाविधेषु देशेषु तारतम्यं वद प्रभो। (पृ.६७, पं.१७).

यस्मात्स्थले भवानास्ते साक्षाद्विग्रहरूपवान्। (पृ.६८, पं.२४)
अष्टोत्तरशतस्थाने तिष्ठाम्यहमितस्ततः। (पृ.६९, पं.२)
श्वेतद्वीपे तु तारकम्।

एतेष्वष्टस्थलेष्वेवं रूपं मां विद्धि संस्थितम्॥ (पृ.६९, पं.७-८)

विष्णुस्थानानि शिवस्थानानि च - पृ.६९-७३;

सप्तपुरीनामानि (दश) अरण्यानि च - पृ.७३

गङ्गानालं कुलिहेतावलं वाराणसी पुरी।

विश्वनाथस्य सेवालं सर्वं काश्यां भवेत् प्रिये॥ (पृ.७४, पं.७-८)

॥ पञ्चमोऽध्यायः समाप्तः॥

महत्त्वं कर्मभूमेस्तु विदितं त्वत्प्रसादतः ।

अन्तरिक्षस्य सूर्यस्य गतिं तारागतिं प्रिय ॥

प्रमाणं तालवृक्षस्य कालादीर्दिननिर्णयम् ।

वयःप्रमाणं जन्तूनां फलं पित्र्यं च दैवतम् ॥

सर्वं विस्तार्य देवेश वद मे प्राणवल्लभ । (पृ. ७४, पं. १७-२१)

मेरोरुपरिभागे तु शिंशुमाराख्यमन्दिरे ।

चक्रं षोडशसाहस्रयोजनोच्छ्रायशालिनी ॥ (पृ. ७५, २-३ पं.)

चन्द्रस्य क्षयवृद्धिं मे वद सर्वविदां वर । (पृ. ७८, पं. ६)

मृगाकारं चन्द्रलक्ष्म दृश्यते तत्किमुच्यताम् । (पृ. ७९, पं. १८)

दूरस्थं दृश्यते वस्तु सिंहशार्दूलवत्प्रिये ।

तद्वत् प्रदृश्यते भूमिच्छायापि मृगरूपिणी ॥ (पृ. ८०, पं. ९-१०)

सिंहशार्दूलनामः कश्चिद् वर्तते वा ?

ग्रहणं राहुणा चन्द्रसूर्ययोः केन हेतुना । (पृ. ८०, पं. १२)

कालभेदान् वदाद्य मे । (पृ. ८२, पं. २३)

प्रातस्सङ्गममध्याह्नापराह्णास्सायमित्यमी ।

पञ्च कालास्ततो त्वहस्स्यात् त्रिंशन्नाड्यात्मकं त्वहः ॥ (पृ. ८२, पं. ३-४)

नवविधवत्सराणि तेषामुपयोगश्च, पृ. ८२

प्रलयाः षड्विधाः परिकीर्तिताः ॥

प्राकृतोऽवान्तरो नित्यं नैमित्तिकदिनाङ्गवौ ।

आत्यन्तिकश्च प्रलयास्तत्काले भवन्ति हि ॥ (पृ. ८४, पं. १६-१८)

विधेरायुर्निर्णयादितं सर्वेषां तदुच्यताम् । (पृ. ८५, पं. ३)

नृणां तपःप्रभावेण कथमायुः प्रवर्तते । (पृ. ८५, पं. २४)

पशुपक्षिमनुष्याणामायुःप्रमाणम् । पृ. ८६-८७

॥ षष्ठाध्यायः समाप्तः ॥

कालः खलु मनुष्याणां निदानं पुण्यपापयोः ।

तस्माद्दैवं च पित्र्यं च कालमाचक्ष्व चातुरम् ॥ (पृ. ८८, पं. ११-१२)

एवं दिव्यं नामधेयं कथमासीद्वद प्रभो । (पृ. ८९, पं. ८)

कस्मिन् काले किं कर्तव्यम्? पृ. ८९-९१

देवप्रीतिकरान् कालान् पितृप्रीतिकरान् वद । (पृ. ९२, पं. १२)

माघमासे कृष्णपक्षेऽप्येकादशी चतुर्दशी । (पृ. ९२, पं. १९

अत्र शिवरात्रेर्निर्देशः प्रतीयते, स च ग्रन्थकारोऽयं दाक्षिणात्य इति सूचयति । अथ च काशीमाहात्म्यं सर्वत्र गायति ।

सुब्रह्मण्यप्रपूजया । (पृ. ९३, पं. २३)

काश्यां गङ्गाजले स्नात्वा सर्वं भजति पण्डितः । (पृ. ९८, पं. २३)

॥ सप्तमाध्यायः समाप्तः ॥

कर्मभूमौ मनुष्याणां सृष्टिं विस्तार्य मे वद ।

कथं जाता नराः सर्वे कथं भूमिं समागताः ॥

चातुर्वर्ण्यं कथं भूतं तेषां विशेषतः कथम् । (पृ. ९९, पं. ९-११)

ब्राह्मणानां तु का वृत्तिः किं दानं कर्म किं स्मृतम् ।

का देवता कीदृशी च देवतानामुपासनम् ॥

प्राप्यं लोकान्तरं किं वा यावत्तत्र वसेत् पुमान् ।

एवमेवं ब्राह्मणादिवर्णानां वद मे प्रभो ॥ (पृ. १०२, पं. ३-६)

चातुर्वर्ण्यप्रविष्टस्य शूद्रस्य नियमोदितम् ।

कर्म नाभूत् कथं तस्मै वद त्वं प्राणवल्लभ ॥ (पृ. १०४, पं. ५-६)

॥ अष्टमोऽध्यायः समाप्तः ॥

विदितो मे वैश्यधर्मः क्षात्रधर्मं वद प्रभो । (पृ. १०७, पं. ८)

विस्तरेण क्षात्रधर्मं श्रोतुमुत्कण्ठते मनः ।

राजधर्मं प्रवद मे जीवातुर्जगतां नृपाः ॥ (पृ. १०७, पं. २२-२३)

भवतु ब्राह्मणो राजा क्षत्रियो वैश्य एव वा ।

का हानिस्तत्र वद मे किमाधिक्यं तु शङ्कर ॥ (पृ. १०८, पं. ६-७)

सामुद्रिकाख्यशास्त्रेषु पुंसां स्त्रीणां च लक्षणम् ।

शुभाशुभप्रदं प्रोक्तं द्रष्टव्यं तद्वद प्रभो ॥ (पृ. १०९, पं. १०-११)

॥ नवमोऽध्यायः समाप्तः ॥

यस्य पुंसः स्त्रियो वापि लक्षणं वा विलक्षणम् ।

भवेत्तयोः फलप्राप्तिराध्यात्मिकफलं विदुः ॥

आध्यात्मिकफलं किंतु तद्विभज्य वद प्रभो । (पृ. १२०, पं. १५-१७)

ज्योतिःशास्त्रप्रकारोक्तं जातकं मे वद प्रभो । (पृ. १२०, पं. २२)

कालस्य सूक्ष्मो ऽहि कथं जन्मनाडीविनिश्चयः । (पृ॰ १२२, पं॰ २३)

दशाक्रमं ग्रहाणां तु वद मे प्राणवल्लभ । (पृ॰ १२६, पं॰ १२)

॥ दशमाध्यायः समाप्तः ॥

कर्तव्यं वद भूभुजः (पृ॰ १२८, पं॰ १९)

तस्माद् भूपालविहितां वद नीतिं ममाधुना । (पृ॰ १३१, पं॰ २४)

वेदस्मृतिपुराणेषु वाल्मीकीये च भारते ।

प्रोक्तेतिहाससहितां राजनीतिं वद प्रभो ॥ (पृ॰ १३७, पं॰ १-२)

॥ एकादशाध्यायः समाप्तः ॥

उत्पत्तिं जातिभेदं च रत्नानां वद मे प्रभो । (पृ॰ १४८, पं॰ २१)

अर्घनिर्णयमेतेषां ज्ञातव्यं केन तद्वद । (पृ॰ १५७, पं॰ १५)

॥ द्वादशाध्यायः समाप्तः ॥

धनं धान्यं च रत्नौघमर्जयन्नीतिमार्गतः ।

चतुरङ्गबलस्यापि वृद्धिं कुर्यान्महीपतिः ॥ (पृ॰ १५९, पं॰ १-२)

विष्णुबेरं च पुरुषं सत्यं सङ्कर्षणं तथा ।

अनिरुद्धमिति प्रोक्तं पञ्चबेरं मदालये ॥

महेशानं तत्पुरुषमघोरं वामदेवकम् ।

सद्योजातमिति प्रोक्तं पञ्चबेरं शिवालये ॥ (पृ॰ १६२, पं॰ २०-२३)

कस्मिन् शास्त्रे किंनादितं नर्तनं तद्वद प्रभो। (पृ. १६३, पं. १३)

भावना कोऽत्र कियती कियान् रागप्रविस्तरः।

तालसंख्या च कियती सर्वं वद मम प्रिय ॥ (पृ. १६३, पं. २३-२४)

रङ्गस्य मण्डनं नाट्यप्रकारं पात्रलक्षणम्।

नाट्याचार्यान्नाट्यवाद्यान् सभानायकलक्षणम् ॥

सर्वं विस्तार्य मे नाथ वद सर्वविदांवर। (पृ. १६८, पं. ४-६)

॥ त्रयोदशाध्यायः समाप्तः ॥

यज्ञसंबन्धिनः प्रश्नास्तेषां समाधानं च - पृ. १७३-१७८

अग्निमहत्त्वं मे ब्रूहि यज्ञस्य काति स्मृताः।

हुतान्यग्नौ कथं देवा प्राप्नुवन्ति हवींषि च ॥ (पृ. १७८, पं. ८-९)

निर्मन्थ्यः पवमानः स्याद् वैद्युतः पावकः स्मृतः।

यश्चासौ तपते सूर्ये शुचिरित्यभिधां गतः ॥ (पृ. १७९, पं. ३-४)

सौदाग्निर्भूतले लीनः, पृ. १७९, पं. ९

सर्वेषामुदरस्थाग्निर्वैश्वानर इति स्मृतः। (पृ. १८०, पं. ४)

॥ चतुर्दशाध्यायः समाप्तः ॥

अतः परं प्रवक्ष्यामि दिव्याग्निवैभवं शृणु। (पृ. १८२, पं. २)

भौमाग्निर्दलजननात् संस्कारेणान्तरिक्षकः।

आधानेन च दिव्याग्निः, (पृ. १८२, पं. १०-११)

होमद्रव्याणि कान्याहुः (पृ. १८३, पं. २१)

अग्नौ हुतं यथामेव तत्कथं तृप्तिदं भवेत्। (पृ.१८६, पं.२०)

क्षत्रधर्मस्तु कथितः विप्रधर्मं वदामि ते। (पृ.१९३, पं.२३)

॥ पञ्चदशाऽध्यायः समाप्तः ॥

ब्राह्मण्यं त्रिविधं लोके जातिवर्णगुणसद्गुणैः। (पृ.१९५, पं.६)

वसुरुद्रादिवर्णेषु प्रशस्तं मौञ्जिबन्धनम्।

विप्रक्षत्रियवैश्यानां कस्मात्त्वं हेतुकं वद॥ (पृ.१९७, पं.१-२)

पुमानुद्वहते बह्वीः नारी नोद्वहते बहून्।

एतद्विधेः प्रमाणं किं वद मे प्राणवल्लभ॥ (पृ.१९८, पं.२१-२२)

चत्वारिंशत्प्रभेदानां (संस्काराणां) नामधेयानि मे वद। (पृ.१९९, पं.६)

एकविंशतिभेदा हि स्वर्गाः काण्डचोदनात्। (पृ.२००, पं.३)

तेषां प्रत्येकतो नाम तद्गम्यं कर्म मे वद। (पृ.२००, पं.१६)

चतुष्षष्टिकलाभेदनामानि वद मे प्रभो। (पृ.२०१, पं.२१)

शैवं च वैष्णवं सौरं शाक्तं वैनायकं तथा।

.... दर्शनानि हि षट् कलाः॥ (पृ.२०२, पं.१३-१४)

॥ षोडशाऽध्यायः समाप्तः ॥

आह्निकं विप्रविहितं गृहस्थाश्रमगोचरम्।

नित्यकर्म समाख्याय वद हेतुसमन्वितः॥ (पृ.२०३, पं.१६-१७)

विप्रोर्ध्वपुण्ड्रं वहते हेतुं वद जगत्पते। (पृ.२०५, पं.१५)

भस्मना चन्दनेनापि त्रिपुण्ड्रं शैवमानवाः ।
आलिके रचयन्त्येतत् त्रितयं मान्यमिष्यते ॥ (पृ. २०५, पं. २०-२१)

कपिलामहत्त्ववर्णनम् , पृ. २०८ - २०९

औपासनाग्निर्द्वारिद्रं हन्मादीति कथं वद । (पृ. २१०, पं. ५)

॥ सप्तदशाध्यायः समाप्तः ॥

देवताराधनविधिं विस्तारेण वद प्रभो । (पृ. २११, पं. १७)

सालग्रामस्य माहात्म्यं विस्तारेण वद प्रभो । (पृ. २१३, पं. ४)

एकाशीतिप्रभेदानां मूर्तीनामभिधां वद । (पृ. २१३, पं. २०)

एकोनषष्टिभेदाः स्युः माधवा मूर्तयः प्रिये ।
षड्विधा मूर्तयः शम्भोः ब्रह्मणः पञ्च मूर्तयः ॥
विष्णुशङ्करमूर्ती द्वे त्रिमूर्तिरिति कीर्त्यते । (पृ. २१३, पं. २२-२४)
नरस्य तव शेषस्य गरुडस्य विवस्वतः ।
गुहस्य दत्तात्रेयस्य कार्तवीर्यार्जुनस्य च ॥
एकैका मूर्तिराख्याता प्रोक्तैकाशीतिभेदतः ।
तत्तन्नामानि वक्ष्यामि शृणु तामरसेक्षणे ॥
मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
परश्वधोपेतरामः सीतारामो बलो जिनः ॥
कृष्णः कल्की केशवाख्यो माधवो मधुसूदनः ।
त्रिविक्रमश्च गोविन्दो हृषीकेशो जनार्दनः ॥
दामोदरः पद्मनाभः प्रद्युम्नश्चानिरुद्धकः । (पृ. २१४, पं. १-९)

मधुजिच्चो वासुदेव उपेन्द्रः पुरुषोत्तमः ॥
अधोक्षजो हरिर्विष्णुरच्युतश्च सुदर्शनः ।
हयग्रीवो यज्ञदत्तः कपिलः पारिजातकः ॥
श्रीकुमारो मुकुन्दश्च हंसः परमहंसकः ।
वैकुण्ठः पुण्डरीकाक्षो देवदेवः श्रियः पतिः ॥
वटपत्रशयोऽनन्तो लक्ष्मणो गरुडध्वजः ।
विश्वम्भरो विश्वरूपो जगद्योनिस्तथैव च ॥
पीताम्बरधरश्चैव मायावीरश्ववांस्तथा ।
नारायणश्चक्रपाणिरमृताहरणस्तथा ॥
बहुरूपः पुण्डरीकः सीरपाणिः प्रलम्बहा ।
एकोनषष्टिभेदाश्च मदीया मूर्तयः स्मृताः ॥
त्रिमूर्त्यात्मको हरहरिः शिवनारायणाभिधः ।
स्वयम्भूः परमेष्ठी च स्वर्णगर्भश्चतुर्मुखः ॥
पितामहश्च पञ्चैते गदिता ब्रह्ममूर्तयः ।
शिवनाभिस्त्र्यम्बकश्च सद्योजातादयस्तथा ॥ (पृ. २१४, पं. १०-२४)
वामदेवस्तत्पुरुष ईशानश्चाष्ट च शङ्कराः । (पृ. २१५, पं. १)
अज्ञानमूर्तिं गुह्यं च वद वर्णादिदोषतः । (पृ. २१५, पं. ८)
वैखानसं पाञ्चरात्रं शैवमित्यागमं त्रयम् ।
देवालये पूजनीयं गृहे वैदिकमन्त्रतः ॥ (पृ. २१६, पं. १४-१५)

ब्राह्मणोऽसौ मनुष्यो हि देवताभिः कथं भवेत् । (पृ. २२०, पं. ६)

कालिदासेन सन्तुष्टाश्चन्द्रगुप्तादयः श्रिये ।

न लिखन्ति कृतं पापं लिखन्ति सुकृतं बहु ॥ (पृ. २२२, पं. ७-८)

कटुतिक्तकषायं च भिन्नं च मधुरोऽम्लकः ।

लवणश्च रसास्तस्य सूर्याद्याः क्रमशोऽधिपाः ॥ (पृ. २२३, पं. ११-१२)

॥ एकोनविंशाध्यायः समाप्तः ॥

भोजनस्य प्रकारं मे सविस्तारं वद प्रभो । (पृ. २२४, पं. ४)

संपादयति राजा तु जन्तुभ्यो बहुलां श्रियम् ।

यज्ञकालं तासु रतिं कर्तो वा तोडीपि वद ॥ (पृ. २३२, पं. १३-१४)

॥ विंशाध्यायः समाप्तः ॥

निद्रां प्राप्तस्य जीवस्य स्वप्नः कश्चित् प्रदृश्यते ।

इन्द्रियेषु विलीनेषु कथमिन्द्रियचेष्टनम् ॥ (पृ. २३४, पं. २-३)

दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ।

भावी च दोषजश्चैव स्वप्नस्सप्तविधः स्मृतः ॥ (पृ. २३४, पं. ९-१०)

सुस्वप्नं चैव दुःस्वप्नं विभज्य वद मे प्रभो । (पृ. २३४, पं. २२)

स्वस्थानाद् दृश्यते किंतु निमित्तं भूतिसूचकम् । (पृ. २३८, पं. १२)

एतदादीन्यरिष्टानि दृष्ट्वा वाराणसीं व्रजेत् । (पृ. २४०, पं. १४)

गृहस्थाश्रमकर्माणि संगृह्य वद मे प्रभो । (पृ. २४०, पं. १७)

॥ एकविंशाध्यायः समाप्तः ॥

ज्ञानस्याश्रयगतं कर्तव्यं कर्म किं वद । (पृ. २४१, पं. २३)

योगक्रमं मे विस्तार्य वद सर्वविदां वर । (पृ. २४३, पं. ९)

नित्यो मायावृतो जीवो लिङ्गदेहं श्रितो ह्यणुः (पृ. २४४, पं. १३)

बहूदकः कुटीचकश्च हंसः परमहंसकः ।

चतुर्विधः (संन्यासी) (पृ. २४५, पं. २०-२१)

मुक्तिसाधनभूतं यत् ज्ञानं किं तद्वद प्रभो । (पृ. २४७, पं. १०)

अद्वैतवादिनो द्वैतज्ञानमुपेयुषः प्रपत्तिपाशीकृतस्य चेति त्रिविधस्यापि मुमुक्षोर्ज्ञानमेव परं मुक्तिसाधनम् - पृ. २४७

॥ द्वाविंशोऽध्यायः समाप्तः ॥

ब्रह्म तण्डुलवन्माया तुषवद् योज्यते द्वयम् ।
अन्योन्यसङ्गे नास्त्येव केवलात् कार्यसंभवः ॥
तुषहीनं कार्यदक्ष तण्डुलं न प्ररोहति ।
तथा प्रकृतिहीनं तु ब्रह्म नो सृजते जगत् ॥
मायाजडापि संयुक्ता ब्रह्मणः कार्यकारिणी ।
पतिव्रतेव माया तु ब्रह्मणो वशवर्तिनी ॥
देहेष्वेव जीवं वशगं कृत्वा नित्यं प्रकर्षति ।
सूर्यवद् ब्रह्म शशीवद् जगत्स्थानादि तद्द्वयम् ॥
सूर्येण वर्धते चन्द्रः क्षीयते भानुना पुनः ।
भानौ प्रलीयते चन्द्रस्तस्मादुत्पद्यते पुनः ॥
एवं तु ब्रह्मणो वृद्धिः [illegible] (पुनः) ।

अनादेवं प्रकारेण वर्तते मुक्तभागिनी ॥

ब्रह्मांशः कालवज्जीवः सूर्यवत् भासतेऽनिशम् ।

सान्निध्याद् ब्रह्मणो जीवो भजतीह गतागतिम् ॥ (पृ. २४८, पं. ११-२४)

ब्रह्मप्रकृतिजीवानां स्वरूपं गदितं प्रिये । (पृ. २४९, पं. १)

ज्ञानं भवेच्चित्तशुद्धौ चित्तशुद्धिर्हि कर्मणा ।

तस्मात् परम्पराहेतुः कर्म साक्षान्न कारणम् ॥ (पृ. २४९, पं. १६-१७)

ज्ञानाद्ध्यानाच्च तपसा लभ्यते मुक्तिरित्यहो । (पृ. २४९, पं. २४)

मृषा वदन्ति मुक्तिस्तु ज्ञानसाध्या न चेतरैः ॥ (पृ. २५०, पं. १)

देवानामादिरव्ययः परमो विष्णुरीरितः ।

ततोऽधिकं ब्रह्म नित्यं चित्स्वरूपं परात्परम् ॥ (पृ. २५०, पं. ९-१०)

ज्ञानैकसाध्या मुक्तिः प्रोच्यते वैदिकैः प्रिये ।

कीदृशी सा च तद्धेतुः कीदृशं ज्ञानमुच्यते ॥ (पृ. २५१, पं. ५-६)

मुक्तिश्च त्रिविधा प्रोक्ता अद्वैतद्वैतवादिभिः । (पृ. २५१, पं. ८)

द्वैतासक्तात्मभिस्त्वेवं प्रोच्यते मुक्तिरिन्दिरे । (पृ. २५३, पं. १)

अद्वैतब्रह्मणि मनो निरालम्बान्न वर्तते ।

सगुणं ब्रह्म सालम्बं द्वैते मुक्तेयमिन्दिरे ॥ (पृ. २५५, पं. १०-११)

चतुर्विधा द्वैतमुक्तिस्त्वासां नामानि शृणु प्रिये ।

सालोक्यं चेति सामीप्यं सारूप्यं सह युज्यता ॥

भक्तिप्रणतिगम्या सा त्रिविधा ज्ञानतो भवेत् ।

सायुज्यमुक्तिरेका तु तस्माद् ज्ञानं प्रसाद्यते ॥ (पृ. २५५, पं. २०-२३)

भक्त्या श्रद्धया यो मर्त्यो मां वा स्त्रीमुपासते ।

प्रसादादावयोः स्थूलसूक्ष्मदेहद्वयं त्यजेत् ॥

स कारणशरीरस्थो लोकं प्राप्याऽवयोः प्रिये ।

सारूप्यं प्राप्य कल्पान्तं वसेदानन्दतुन्दिलः ॥

ततस्तां मुक्तिमाप्नोति लिङ्गध्वंसो यदा भवेत् ।

त्यक्त्वा लिङ्गशरीरं (पृ. २५६, पं. १४-१७)

कारणीभूतिका (पृ. २५८, पं. १-६)

॥ त्रयोविंशाऽध्यायः समाप्तः ॥

मङ्गुरजाति वर्णनम्, पृ. २५८-२६१

सामान्यार्थकथनम्, पृ. २६०-२६१

॥ चतुर्विंशाऽध्यायः समाप्तः ॥

अतः परं प्रवक्ष्यामि स्त्रीणां धर्मं शृणु प्रिये ।

स्वकीया परकीया च सामान्येति त्रिधा स्मृताः ॥ (पृ. २६२, पं. ७-८)

वद तत्त्वं कथं नित्यमैक्यं स्याद् भर्तृभार्ययोः । (पृ. २६३, पं. ७)

भर्तुः पूर्वं मृता ~~स्त्री~~ साध्वी कुत्र तिष्ठति मे वद । (पृ. २६६, पं. १०)

कुत्रमाहात्म्यवर्णनम्, पृ. २६६-२७१

॥ पञ्चविंशाऽध्यायः समाप्तः ॥

किं फलं पुत्रजननात् पुत्राभावादयं किमु ।

बहुपुत्रप्रजननात् किं फलं लब्ध प्रभो ॥ (पृ. २७१, पं. ९-१०)

तातं जीवति पुत्रेण किं कर्तव्यं मृते सति ।

किं कर्तव्यं च विस्तार्य वद मे भक्तवत्सल ॥ (पृ. २७२, पं. २२-२३)

मृतस्य देहघटे निक्षिपन्तीति केचन ।

केचिदग्नौ प्रक्षिपन्ति द्वयोरपि फलं वद ॥ (पृ. २७३, पं. १८-१९)

देहान्तरप्राप्तिहेतुं मृतदेहस्य मे वद । (पृ. २७४, पं. ७)

कथं श्राद्धं प्रकर्तव्यं तद्विधानं च कीदृशम् । (पृ. २७६, पं. २२)

॥ षड्विंशोऽध्यायः समाप्तः ॥

कर्मणा धनिकश्चास्ते कर्मणास्ते ह्यकिञ्चनः ।

कर्माधीनं जगत्सर्वमिति शास्त्रमतं खलु ॥

कर्म वा फलदं लोके देवो वा फलदः स्मृतः । (पृ. २७९, पं. ८-१०)

तत्कर्म त्रिविधं लोके पौराणस्मार्तवैदिकम् । (पृ. २८०, पं. २२)

यथा देहस्थितो जीवो भोगभाग्यं समश्नुते ।

तथा कर्मस्थितो देवो ददाति सकलं फलम् ॥ (पृ. २८१, पं. ८-९)

भूलोके पुत्रपौत्रैश्च धनधान्यैर्युतो भवेत् ।

केनैककर्मणा मर्त्यस्तद्वदाम्बुजलोचन ॥ (पृ. २८१, पं. १६-१७)

दानानि कानि श्राद्धेषु भोज्यानि वद मे प्रभो । (पृ. २८२, पं. ६)

ज्ञातिलिङ्गनाशप्रदानं च (पृ. २८३, पं. ८)

प्रतिग्रहप्रकारं तु विस्तृतं वद मे प्रभो । (पृ. २२४, पं. २१)

॥ सप्तविंशत्पादः समाप्तः ॥

ब्रह्मादिदेवतारूपस्त्वथापि त्वं कुतो भुवि ।

दशावतारान् कुरुषे दुःखभूतान् वद प्रभो ॥ (पृ. २८६, पं. १२-१३)

मत्स्यावतारकरणे माहात्म्यं किं नु पार्वति । (पृ. २८७, पं. १३)

कस्माद्धेतोः कूर्मरूपं धृतवान् तद्वद प्रभो । (पृ. २८८, पं. १)

कस्माद्वराहरूपं तु धृतवानसि तद्वद । (पृ. २८८, पं. २३)

अर्धरूपं मृगाकारमर्धरूपं च मानुषम् ।

एतादृशं किं धृतवान् रूपं तद्वद मे प्रिये ॥ (पृ. २८९, पं. १३-१४)

वामनं रूपमाश्रित्य कस्माज्जातो वद प्रभो । (पृ. २९०, पं. ८)

जमदग्निसुते रामे किमर्थं त्वत्प्रवेशनम् । (पृ. २९१, पं. २)

जातो दशरथात् कस्मात् स्थितोऽसि त्वं विना च माम् । (पृ. २९१, पं. १७)

बलरामावतारस्य करणे कारणं वद । (पृ. २९२, पं. ११)

कृष्णावतारं कृतवान् कस्मात् त्वं प्राणवल्लभ । (पृ. २९२, पं. २४)

बौद्धरूपं कृतं कस्मात् त्वया तद्वद मे प्रभो । (पृ. २९४, पं. १२)

बौद्धं वैनायिकं चैव जैनं सौत्रान्तिकं तथा ।

योगाचारं सौगतं च कापालिकमतार्हतम् ॥

कालामुखं माध्यमिकं पाखण्डं क्षपणं तथा ।

एवं नानाविधैर्बौद्ध[illegible] ॥ (पृ. २९४, पं. १७-२०)

किमर्थं कल्किरूपस्त्वं भविष्यसि कलौ युगे । (पृ. २९८, पं. १७)

कलौ प्राप्ते केन पापमाचरन्ति जना भुवि । (पृ. २९८, पं. २२)

लीलामूर्तिरिति प्रोक्ता दृश्यमानावतारकैः ।

स्वानन्दानुभवः प्रोक्तो नित्यमूर्तिर्विधौ प्रिये ॥ (पृ. २९९, पं. २२-२३)

॥ अष्टाविंशाध्यायः समाप्तः ॥

विष्णुमाहात्म्यवर्णनम्, वैकुण्ठकृतविष्णुस्तोत्रं च, पृ. ३००-३०३

॥ एकोनत्रिंशाध्यायः समाप्तः ॥

केनावतारं नो कुर्यात् कारणेन महेश्वरः ।

कार्पण्यमन्यैर्दुष्कराणि किमर्थं कृतवान् शिवः ॥ (पृ. ३०४, पं. २-३)

कानि कार्याणि कृतवान् माहात्म्यं किं प्रकाशितम् । (पृ. ३०४, पं. ११)

अहं शिवश्च सदृशौ उभौ लोकाधिपौ प्रिये ।

उभौ स्वतन्त्रौ लोकेषु प्रपञ्चं कारवावहे ॥

उभयोर्भेदज्ञानं तु अज्ञत्वान्न विदुः प्रिये । (पृ. ३०५, पं. ११-१३)

काशीं प्रत्यहं केन कारणेन वद प्रिय । (पृ. ३०५, पं. १५)

काशीगतमाहात्म्यम्, पृ. ३०५-३०८

शिवस्तोत्रप्रकारं च वद मे प्राणवल्लभ । (पृ. ३०९, पं. १)

इत्येवमुक्त्वा ऋषभो महात्मा स्कन्दं समामन्त्र्य गुरुं प्रसन्नम् ।

ययौ मुनीनां निकटं पुराणं प्रवक्तुकामः परिपूर्णकामः ॥

इति श्री वेङ्कटरायविरचितायां लक्ष्मीनारायणीयसंहितायां त्रिंशोऽध्यायः

॥ श्रीरस्तु ॥

प्रासूत यं यदमलान्वयकुक्षोऽलुमेलु-

मङ्गाम्ब गार्ग्यकुलकल्पतरुप्रकाण्डम् ।

आलोक्य शास्त्रमखिलं स चकार लक्ष्मी-

नारायणाख्यमिह वेङ्कटरायसूरिः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

उपेन्द्रसंहिता

गवर्नमेन्ट ओरियण्टल मैन्युस्क्रिप्ट लाइब्रेरी

मद्रास

D ५२०९ संख्या

प्रतिलिपि

सरस्वतीभवन पुस्तकालय, वाराणसी

७२२१८ संख्या

पृष्ठसंख्या १-५५

(D ५२१० संख्याकाऽस्यैव (ग्रन्थस्य) द्वितीया मातृका)

१ क एकदा तु समासीना मुनयः शौनकादयः ।

नारदं परिपप्रच्छुर्नैमिषारण्यमाश्रिताः ॥ १॥
सर्वशास्त्रार्थसारज्ञ पुराणस्मृतिपारग ॥ २॥
श्रीपाञ्चरात्रपयोधिपरिशीलनतत्पर । (पृ. १, पं. ६-७) <u>१ क</u>

पुरा श्रुता विशेषेण कृतत्रेतादिसंश्रिताः ।

चातुर्वर्ण्यसमाचारा गतयश्च तदाश्रिताः ॥ ४॥

एकान्तिनां समाचाराः परमैकान्तिनामपि ।

स्वर्गादिगतयः प्रोक्तास्तथा मोक्षप्रदा गतिः ॥ ५॥

तत्तद्युगानुसारेण तत्तद्धर्मसमाश्रिताः ।

कथिता धर्मवैगुण्यात्तेषां ह्रासाभिवृद्धयः ॥ ६॥

पूर्णः प्रोक्तः कृते धर्मस्त्रेतायां तु त्रिपादवान् ।

द्वापरे त्वर्धमात्रेण कलौ पादेन कीर्तितः ॥ ७॥

कामः क्रोधश्च लोभश्च मदो मोहस्तथैव च ।

मात्सर्यदम्भगर्वाश्च अहङ्कारस्तथैव च ॥ ८॥

१ ख एते कलिगुणाः प्रोक्ता वर्धन्ते च दिने दिने ।

~~१ क~~ तथापि सुलभा मुक्तिरिति संक्षेपतः पुरा ॥ ९॥ (पृ. १, पं. ९-२०)

कलावपि महाभाग भवता कथिता मुने ।

एतस्मिन्नपि काले तु मोक्षवार्ता कथं भवेत् ॥ १०॥ (पृ. २, पं. १-२)

पुरा देवसभामध्ये समासीनं जगत्पतिम् ।

उपेन्द्रं जगतामीशं कवः प्राञ्जलिरब्रवीत् ॥ १३॥ (पृ. २, पं. ७-८)

उपेन्द्रः —

२क तात कण्व ऋषिश्रेष्ठ श्रोतुमर्हसि तत्त्वतः ।
धन्योऽसि कृतपुण्योऽसि यत्त्वया पृष्टवानहम् ॥१८॥
वैकुण्ठे तु परे लोके श्रिया सह पूर्णकान् ।
आचिन्त्य यदमेयात्मा नारायण उदारधीः ॥१९॥ (पृ० २, पं० १७-२१)
अखिलकल्याण् समालोक्य जन्तून्गतिकातरम् ।
मत्प्रसादजनार्थाय किं कुर्यामिति माधवः ॥२०॥
तेषां कलेवरप्रीति ददौ करुणया हरिः । (पृ० ३, पं० १-३)

३क सनकादिमुखाद् ज्ञानं संप्राप्य प्रीतिमानयम् ।
सर्वेशं जगतामीशं नारायणमनामयम् ॥३६॥
वासुदेवं जगद्योनिं सर्वस्यात्मानमीश्वरम् ।
श्रियः पतिं गुणातीतं तं गुणाश्रयमच्युतम् ॥३७॥ (पृ० ४, पं० १३-१६)
मत्स्यकूर्मादिरूपेण त्वंशरूपेण तत्त्वतः । (पृ० ४, पं० १८)

३ख सार्थितः कृष्णरूपेण संकर्षणपुरस्सरः । (पृ० ५, पं० ८)
तत्त्वोपदेशव्याजेन सर्वतत्त्वार्थसंग्रहम् ।
(गीतां) प्रपत्तिशास्त्रं विस्तीर्य नानादृष्टान्तपूर्वकम् ॥४७॥ (पृ० ५, पं० १५-१६)

४क इत्युपेन्द्रसंहितायाम् उत्तरभागे कण्वप्रश्ने
प्रथमोऽध्यायः ॥

दैवं आर्षो मानुषश्च त्रिप्रकाराः प्रकीर्तिताः । (पृ. ६, पं. १२)

४ ख येनाकारेण सनकसनन्दनमुखा मुने ।

समर्चयन्ति जगन्नाथं . . . . ॥ ४॥

मेरोरुत्तरतः क्षीरसागरस्य समीपतः ।

श्वेतद्वीपे महापुण्ये सर्वकामार्थसंयुते ॥ ५॥

श्रीपाञ्चरात्रतन्त्रोक्त श्रीमदष्टाक्षरे रताः । (पृ. ६, पं. १४-१७, १९)

वपकादयश्चार्चकाः ।

चतुर्भिस्संस्कृताः शुद्धाः सेव्यैरन्यैर्मुने ।

जातेन कर्मणा चैव वैष्णवेनैव कर्मणा ॥ ८॥

विवाहकर्मणा चापि समाराधनकर्मणा ।

नित्यशुद्धाः क्षीणपापाश्चैव सर्वज्ञाः शोभनाः ॥ ९॥

केवलैः कामभोगैश्च वर्जिताः सुमनोहराः ।

स्त्रियः पुमांसः सर्वेऽपि पञ्चकालपरायणाः ॥ १०॥ (पृ. ७)

५ क श्रीभूमिनीलासहितं देवदेवं जनार्दनम् । (पृ. ७, पं. ११)

५ ख आद्यानूर्ध्वपुण्ड्रांस्तु (पृ. ८, पं. ७)

६ क प्रातश्च संगवश्चैव मध्याह्नश्चापराह्णकः ।

सायाह्न इति हि प्रोक्ताः कालाः (पञ्च) विधाः क्रमात् ॥ ३३॥

आद्ये ऽभिगमनं प्रोक्तमुपादानं द्वितीयके ।

६ ख इज्या तृतीयकाले तु स्वाध्यायस्तु चतुर्थके ॥ ३४॥

योगस्तु पञ्चमे काले पञ्चकालस्थानमीरितम् । (पृ. ९)

प्रथमान्तरं नाम स्वात्मात्मीयसमर्पणम् ॥३५॥
सत्यात्मत्वेन सर्वेषां सत्ययेति परिकीर्तितम् । (पृ. ९)
७ क एवं दिने दिने नित्यं श्वेतद्वीपनिवासिनः ।
कल्पान्तं कल्पपर्यन्तं समाराध्य जनार्दनम् ॥४९॥
कल्पान्ते वैष्णवं धाम प्राप्स्यन्ति परमं पदम् ।
एवं वैष्णवसमाचारः प्रोक्तः शुश्रूषवे मुने ॥५०॥ (पृ. ११)

इत्युपेन्द्रप्रोक्तायां कुमाराख्ये अर्थोपेन्द्रसंवादे
द्वितीयोऽध्यायः ॥

---

७ ख आर्यसंघं प्रवक्ष्यामि द्वितीयं शृणु तापस । (पृ. ११, पं. १२)
वेङ्कटाद्रिं समारभ्य चायामान्ता हि कर्मभूः । (पृ. १२, पं. १)
ततः कुमारिकान्ते सेतुपर्यन्तमुत्तमः ॥६॥
आर्यभूमयः प्रोक्ता वर्णाश्रमविवर्जिताः ॥७॥
८ क तत्रापि मथुरा माया काशी वृन्दावनं तथा ।
गया च पुष्करक्षेत्रं सालग्रामं च नैमिषम् ॥८॥
एवमादीनि पुण्यानि क्षेत्राणि विविधानि च । (पृ. १२)
चत्वार आश्रमाः प्रोक्ता ब्राह्मणस्य कलौ युगे ॥१३॥
क्षत्रियस्याश्रमाः प्रोक्तास्त्रयस्तु द्विविधः स्मृतौ ।
आश्रमौ द्वौ तु वैश्यस्य शूद्रस्यैकं गार्हस्थ्यमुच्यते ॥१४॥ (पृ. १२)

९ ख नामादिं पञ्चसंस्कारं दत्वादिमो गर्भधारणम् । (पृ. १३, पं. ५)
आचार्यं वेदसंपन्नं वेदाङ्गपरिनिष्ठितम् ॥ सर्ववेदान्तपारज्ञं अग्रजम् ।..

पुराणागमपारज्ञं पञ्चरात्रगतस्थितम् ।

इतिहासार्थतत्त्वज्ञं सर्वशास्त्रविशारदम् ॥ २०॥

कृतज्ञं सर्वनिष्णातं पञ्चकालपरायणम् ।

एवमादिगुणैर्युक्तमाचार्यं प्राप्य तत्पराः ॥२१॥

कुमारस्य विधानेन पञ्चसंस्कारदीक्षया ।

पञ्चरात्रविधानेन कृत्वा दीक्षाविधानतः ॥२२॥

ततः शुद्धः स्नाना नामयन्त्रो भागवत्पञ्चमः ।

संस्काराः पञ्च दीक्षाणां कर्तव्याः क्रमशो द्विजैः ॥२३॥ (पृ. १३)

॥ तृतीयोऽध्यायः ॥

---

१० क ततो नित्यसमाचारान् वक्ष्यामि शृणु तापस । (पृ. १५, पं. १८)

१० ख एवं पञ्चसु कालेषु पञ्चरात्रोक्तवर्त्मना ॥११॥ (पृ. १६, पं. २०)

स्वस्वसूत्राविरोधेन नित्यकर्मपरायणाः । (पृ. १७, पं. १)

श्रीराघवजयन्त्यां च जयन्त्यां नृहरेरपि । (पृ. १७, पं. ४)

११ क श्रीकाञ्चनमहायोगिभूतयोगिमुखेषु च ।

वकुलाभरणादिभ्यो योगिमुख्येषु च द्विजाः ॥१७॥

तत्तत्प्रणीतद्राविडश्रीसूक्तिषु च सर्वदा ॥१८॥

श्रीरामानुजसिद्धान्तशुद्धान्तःकरणाः शुभाः ॥१९॥

श्रीभाष्यचिन्तनरताः (पृ. १७)

ब्रह्मनादेऽधीकृतसदा-वात्सल्यपरायणः ॥२०॥ (पृ. १७)

विशिष्टाद्वैतसिद्धान्तनिर्धारणपरायणाः। (पृ. १८, पं. ३)

११ ख आर्यभागस्य माहात्म्यं शुश्रूषोस्तव साम्प्रतम्। (पृ. १८, पं. १७)

आर्यभागप्रशंसा नाम चतुर्थोऽध्यायः

कण्वः –

१२ क श्रीकाञ्चनसरोयोगिभूतयोग्यादयस्तथा।

वकुलाभरणाद्याश्च सूरयः परिकीर्तिताः ॥३॥

तत्प्रणीताः प्रबन्धाश्च द्राविडाः परिकीर्तिताः।

क एते सूरयस्तेषां प्रबन्धा अपि कीदृशाः ॥४॥

केषां प्रयोजकाः श्रीमन् वद विस्तरतो हरे।

उपेन्द्रः –

महाप्रलयकाले तु भगवान् लोकनायकः।

अनिरुद्धरूपेण स्वलीनाञ्जन्तून् करुणयान्वितः ॥७॥

कलेबरादियोगं तु कृतवान् तेषु माधवः।

उज्जीवय हृषीकेशात् करणादिकमञ्जसा ॥८॥ (पृ. १९)

योगभूता अपि हरेः किङ्कराश्च अपि स्वयम्। (पृ. २०, पं. १)

तदात्मना आसन् सर्वे मूलप्रकृतिसङ्गताः ॥९॥

१३ क शङ्खः कौमोदकी चैव नन्दकश्च सुदर्शनम्।

विष्वक्सेनं कौस्तुभं च [illegible] ॥२४॥

श्रीवत्सं कार्मुकञ्चैव गदाखड्गाक्षवीजयः ।
भो भो मदाज्ञया यूयं कुरुध्वं मम मङ्गलः ॥२५॥
अयोनिजा योनिजाश्च भविष्यध्वं धरातले ।
द्राविडेषु च देशेषु वेङ्कटाचलपादितः ॥२६॥
चापगानतीषु सम्भूत्वा ब्राह्मणादिषु तापस ।
१३८ब सर्वाधिकारयोग्याभिर्द्राविडीभिश्च सूक्तिभिः ॥२७॥
पाषण्डबौद्धचार्वाकानुपन्याससहस्रशः ।
जित्वा परत्वं सर्वत्र स्थापयध्वमतन्द्रिताः ॥२८॥ (पृ २१)
पाञ्चजन्यादयः केचिद् द्वापरे द्राविडेष्वथ ।
समजायन्त नियता भगवद्भक्तिसंयुताः ॥ ३१॥
कलौ केचिद् भविष्यन्ति नारायणपरायणाः ।
तान् क्रमेण प्रवक्ष्यामि सावधानात् शृणुष्व मे ॥३२॥
द्वात्रिंशत्कोद्गते वर्षाणां द्वापरे युगे ।
सिद्धार्थे च तुलामासे श्रवणे सौम्यवासरे ॥३३॥
काञ्च्यां काञ्चनकासारे कासाराख्यो महामुनिः ।
बभूव पाञ्चजन्यांशो हेमतामरसे शुभे ॥३४॥
ततः परेद्युस्तन्मासे धनिष्ठायां बुधे दिने ।
मल्लपुर्यां महायोगी माधवीकुसुमे शुभे ॥३५॥
कौमोदक्यंशसंभूतो भूतयोगीति विश्रुतः ।

ततः परेद्युस्तन्मासे शततारामनोहरे ॥३६॥ (पृ. २२)

गुरुवारे नन्दकांशो मयूराख्यपुरे महान् ।
१४क कैरवान्तात् समभवत् महदाह्वयभाक् मुनिः ॥३७॥
आह्नाग्नीशीलनन्दनाख्ये याते वर्षे महत्तरः ।
सिद्धार्थिमकरे भानुवारयुक्तमघर्क्षगो मुनिः ॥३८॥ (पृ.२२)
भृगुपत्न्यां महीसारपुरे सौदर्शनांशतः ।
द्वापरे भक्तिसाराख्यः समजायत नीतिमान् ॥३९॥
विशुद्धे ब्राह्मणकुले जनिष्यति महामुनिः ।
कल्पे दत्तागदालीदीनवर्षे गते ततः ॥४०॥
ईश्वरे चैत्रचित्रायां शुक्रवारे मनोहरे ।
कोलूर्यां मधुरकविः समजायत भूसुरः ॥४१॥
कुमुदांशो महाभागः सर्वरक्षार्थमादरात् ।
कलौ युगे तु संप्राप्ते प्रमाथ्यभिधवत्सरे ॥४२॥
द्विचत्वारिंशके याते दिने तापसनन्दन ।
वैशाखे तु विशाखायां शुक्रवारे मनोहरे ॥४३॥
ताम्रपर्णीनदीतीरे कुरुकायां हि विश्रुतः ।
विष्वक्सेनांशतः श्रीमान् शठकोपसमाह्वयः ॥४४॥
जगत्संरक्षणार्थाय शूद्रयोनौ जनिष्यति ।
कलौ युगे गते वर्षे कौस्तुभात्मा विशुद्धधीः ॥४५॥
पराभवे माघमासे पुनर्वसुयुते शुभे ।
गुरुवारे कोल्लिपुर्यां कुलशेखरनामकः ॥४६॥ (पृ.२३)

महात्मा काश्यपकुले संभविष्यति शुद्धधीः ।
तत्त्ववर्षे कलौ याते क्रोधनाब्दे मनोहरे ॥४७॥
मिथुने स्वातिसंयुक्ते भानुवारे शुभोदये ।
वाल्लीपुर्यां विष्णुचित्तो वैनतेयांशसंभवः ॥४८॥
कलौ सिद्धे गते वर्षे नलवर्षे कुलीरके ।
फल्गुन्यां भौमवारे तु तुलसीकानने शुभे ॥४९॥
भूम्यंशेनैव गोदेति कन्या काचिद् जनिष्यति ।
कलौ युगे तु संप्राप्ते वर्षे तु दहरे गते ॥५०॥
